63rd Kerala School Kalolsavam - Jan 04 To 08, 2025 - Thiruvananthapuram

Item Code: 801 Participant Code: 525

विषय :- "प्रकृतिदुरन्तविमुक्त केरलम्।"

उपविषया: :-

- मुखबन्धम् [आमुखम्] ॥
- हरितचुम्बितकेरलम् ॥
- प्रकृतिदुरन्ता: मनुष्यव्यवहारश्च ॥
- प्रकृति दुरन्तानां निवारणम् ॥
- उपसंहारम् ॥

* आमुखम् :-

प्रकृतिदुरन्ता: अद्य जीवनराशय: प्रतिरोधित: एक: बृहत् प्रश्नोऽस्ति। प्रकृतेरुपरि मनुजा: विहितानि दुश्चेष्टितान्येव प्रकृतिं विनाशकारिणि कुर्वन्ति। ते मूढा: स्वपितं सिंहं शयनात् उत्थापयित्वा स्वयं नाशयन्ति। प्रकृति: मातृस्वरूपिणी भवति। वैद्येन विना वैद्य: भविष्यति, मात्रा विना माता भविष्यति, बुभुक्षया पीडितं भोजनं

(This page will be scanned to publish the article in Schoolwiki. So write neatly. Don't fold paper. Don't write overleaf)

भोजनं भविष्यति एवं सर्वेष्वपि सन्दर्भेषु प्रकृतिः सर्वाभीष्ट-दायिनी निश्रेयस्सधायिनी च भवति।

आधुनिकानां अस्माकं चेष्टितैः प्रकृतेः सन्तुलनावस्थां नशीकुर्वन्ति। प्रकृति दुरन्तानां स्थापनसमर्थे तेषां उद्भवं निवारणं च कथमिति ज्ञातव्यं। अद्य "प्रकृतिदुरन्त विमुक्त केरलम्" इति विषयमधिकृत्य एकं लघूपन्यासम् अत्र पश्यामः।

* हरितचुम्बित केरलम् :-

केरलस्य भूप्रकृतिः अन्यादृशं अतुलं अनुभवभेद्यं च भवति। केरवृक्षाः, क्षेत्राः, तटाकाः, नद्यः, केदाराः, सर्वं अतिसुन्दरं भवन्ति। केरवृक्षप्रफुल्लितमस्ति केरलम्। केरलस्य केरवृक्षानां च सौन्दर्यं अनेकाः कवयः तयोः मधुरभावनया वर्णयन्ति। केरलकली मामाङ्गः, उत्सवाः, चरित्रं च अतिमनोहरशक्ति मताः भिन्नोस्ति चेत् केरलीयानां ऐक्यं सहस्रजिह्वावता अनन्तेनापि वक्तुमशक्यम्। जातिमतविवेचनैः विना ते आनन्देन समत्वेन सर्वाणि उत्सवानि कुर्वन्ति।

(This page will be scanned to publish the article in Schoolwiki. So write neatly. Don't fold paper. Don't write overleaf)

पुरा केरले सर्वाः जनाः कृषिं अधिकृत्य जीवनं कुर्वन्ति। प्रकृतिं स्वमातरमिव परिपालयन्ति, स्निह्यन्ति च। अतः कदाचिदपि पर्यावरण नाशः न अभवत्। मनुष्याणां मृदुल व्यवहारेण प्रकृतिः सर्वदा शान्तस्वरूपिणी, सन्तुष्टा च आसीत्। परं नवीनाः वयं प्रकृतिं बहुविधा नाशयन्ति। मालिन्यान् निक्षेपयित्वा, जलम् वायुश्च मलिनीकृत्य ते प्रकृतिं चूषयन्ति। अतः एव ऋतवः यथा काले नागच्छन्ति। वसन्त काले वर्षः, ग्रीष्म काले शरत् एवं ऋतवः चंक्रमणे अनुलता अद्य नास्ति। प्रकृति दुरन्तानां मूलकारणं मानवानां व्यवहारोऽस्ति।

* प्रकृति दुरन्ताः मनुष्यव्यवहारश्च :-

अथर्ववस्य भूमिसूक्ते आर्षैः कथितं यत् "माता भूमिः पुत्रोऽहं पृथिव्याः" इति। इदं हि वाक्यं न केवलं किञ्चित् अनुपमं ध्येयवाक्यं अपि तु आर्षभूमिकायामस्यां मानव प्रकृत्योर्मिथः काले तस्मिन् यः सुदृढः अभेद्यश्च आत्मबन्धो अवर्तत तादृशस्य अन्यत्रादृश्यस्य पर्यावरण प्रेम्णः निदर्शन वाक्यं भवतीत्यहं निश्चयत्वं वक्ष्यामि।

63rd Kerala School Kalolsavam - Jan 04 To 08, 2025 - Thiruvananthapuram

Item Code: 801 Participant Code: 525

अस्मत्पूर्वसूरिभिः आर्षैः अग्रजैः भारतीयैः प्रकृतिः आत्मनो मातृस्थाने गणिता आसीत् । भरतभूमिकायामस्यां आविर्भूतः एकैकोऽपि आत्मानं प्रकृत्यम्बायाः वत्सलात्मजम् अमन्यत, अनया भावनया पर्यावरण संरक्षणं न केवलं साम्प्रदायिकं दायित्वं अपि तु आत्मजननी सेवनमिव अपरिहार्यं कर्त्तव्यमिति सर्वेऽपि पुरातनाः भारतीयाः अमन्यन्त । गीतादिधर्मग्रन्थेषु यत्पञ्चमहायज्ञविधानं निर्दिष्टमत्र मानवानां तत्र तावत् अन्यैः यज्ञैः सहैव भूतयज्ञं विधाय मानवानां प्रकृतिसंरक्षण दायित्वं सुदृढीकृतं बुधैः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ इति कथनेन न केवलं देवाः निर्दिष्टाः परं जीवदायिनी प्रकृतिः अपि तत्र अन्तर्भूतेति अवगन्तव्यं । प्रकृतिं प्रेमभावनया भावयतां इहलोकवासिनां प्रकृतिः सर्वाभीष्टदायिनी, निःश्रेयसप्रदेति च भवति ।

आधुनिकाः वयं विषयतृष्णया उपभोग लालसया परिम्लान चित्ताः आत्मनः प्रकृत्यंशत्वं विस्मृत्य नैमित्तिकलाभलग्नमनाः सन्तः पर्यावरणस्य अनल्पं नाशं विदध्यामः इति खेदास्पदो विषयः । यथा

(This page will be scanned to publish the article in Schoolwiki. So write neatly. Don't fold paper. Don't write overleaf)

63rd Kerala School Kalolsavam - Jan 04 To 08, 2025 - Thiruvananthapuram

Item Code: 801 Participant Code: 525

कश्चित् अभिवर्धितदर्पः धूर्तः कुपुत्रः विषय लाभैः सञ्जातमदः आत्मनः एव जननीं प्रति आदरं संत्यज्य अनाचारं चरति तथा भाति आधुनिकानां अस्माकं प्रकृत्युपरि व्यवहारः। तृष्णया बाधितैः अस्माभिः प्रकृतेरुपरि विहितानि एतानि कुचेष्टितानि वस्तुतया आत्मनः एव नाशकारकाणि भवन्ति। पर्यावरणस्य नाशः वस्तुतया आत्मनः एव प्रणाशः इति भावना धुनिक मनुष्यः न प्रत्यभिजानाति यावत् एतैः अभिद्रोहैः सः प्रकृतिं पीडयन्नेव वर्तिष्यते। भोजनाराधनावास चिकित्सादिषु प्रायः जीवनस्य सर्वेष्वपि मण्डलेषु असमर्थ्यस्वरूपः प्रकृतिं आश्रयन्। एवं पर्यावरण संलग्नः असौ सर्वदा सर्वथा आत्मानं पर्यावरणादविभक्तं अमन्यत। अतः एव कदाचित् अपि आत्मचेष्टितैः सः पर्यावरण नाशः न व्यधास्यत्।

* प्रकृति दुरन्तानां निवारणम् :-

आधुनिकानां अस्माकं चेष्टितैः अग्रिमायै वंशावल्यै प्रकृतेः किं वा भोग्यं योग्यं

(This page will be scanned to publish the article in Schoolwiki. So write neatly. Don't fold paper. Don't write overleaf)

-चारं परिशोधयामः इत्यहं आकुलिता भवामि।

षोडशाधिक द्विसहस्रतमात् वर्षादारभ्य केरले अनुभूयमानः प्रत्येकोऽपि वृष्टिकालः अननुभूताम् अपरिहार्यं च कांश्चन भीतिं सम्मानयति। ओखी झञ्झावातः, प्रथमः द्वितीयश्च प्रलयः, पेट्टिमुटी, कवलप्पार, पुत्तुमल एवं मुण्डक्कै चूरल्मला इत्यादीन् ग्रामान् भूपटातेव उन्मूलनयोग्यानि भूस्खलनानि इति गते दशके प्रकृतेः प्रतिप्रहाररूपेण केरलेनानुभूताः वेदनाः वाचामगोचराः भवन्ति। देवानां स्वकीया भूमिः इति प्रसिद्धा केरलभूः आवन् दैवैः सुतरां परित्यक्ता इत्येव चिन्तनीयम्।

पुनरिमां भूमिं वासयोग्यं विधातुं एकीभूय प्रवर्तनं अपेक्ष्यते प्रकृत्यैः दत्तश्रद्धाःभूत्वा प्रकृतिं सर्वात्मना आदृत्य मनुष्याः व्यवहरेयुः। "माता भूमिः पुत्रोऽहं पृथिव्याः" इति भावनां सदा हृदि स्थापयामः। तया भावनया प्रेरिताः प्रकृतिं स्वमातरमिव रक्षयाम, प्रकृतिं स्निह्याम।

उपसंहारम् :-

प्रकृतेः रक्षणेन भुवने हरिताभां प्रसारयित्वा तेन सर्वभूतसौख्यं साधयामः। प्रकृतिं स्वमातरमिव स्निह्य भुवने आनन्दं पुनः प्राप्यामः। अस्माकं दुःखवेलायां सर्वैः सह तिष्ठन्तः माता सह वयं दुष्काले अपि तिष्ठामः। प्रकृतिनशीकरणेन विना प्रकृत्याः पालनं करिष्यामः। प्रकृतेः रक्षणं आत्मनो रक्षणं इति विज्ञाय वर्तामहे इत्युक्त्वा अहं इदं लघूपन्यासं विरमामि।

X ——— X